**तूणी** स्त्री तूण्यते पूर्य्यते शरैः तूण–पूरणे घञ् गौरा० ङीष् । १इषुधौ २तूणे ३नील्यां शब्दार्थचि० । ४तूणे स्त्री टाप् शब्दार्थचि० ।

**तूणीक** पु० तूणीव कायति कै–क । नन्दिवृक्षे राजनि० ।

**तूणीर** पु० तूण्यते पूर्य्यते शरैः तूण–पूरणे बा० ईरन् । १तूणे इषुधौ अमरः ।

**तूतक** न० तुत्थ+पृषो० । तुत्थे (तुँतिया) शब्दच० ।

**तूतुजान** पु० तुजि–बले कानच् तुजा० अभ्यासदीर्घः बा० नलोपः । १क्षिप्रे निघण्टुः ।२पर्य्यमाणे च तुजधातौ दृश्यम् ।

**तूतुजि** स्त्री तुजि–बले दाने वा कि द्वित्वे तुजा० अभ्यासदीर्घः नलोपः । १क्षिप्रे निघण्टुः २दातरि च । “जज्ञेऽनूतुजिं चित्तूतुजिरशिश्नत्” ऋ० ७।२८।२ । “तूतुजिर्दाता” भा० ।

**तूतुज्यमानास** पु०तुजि–बले कर्मणि शानच् द्वित्वम् अभ्यासदीर्घः बा० नलोपः तथाभूतः असति दीप्यते अस–दीप्तौ अच् कर्म्म० । क्षिप्रे निघण्टुः।

**तूतुम** त्रि० तुज–अच् द्वित्वे अभ्यासदीर्घः पृषो० ।·१तूर्णे माधवः “सवना तूतुमा कृषे” ऋ० १०।५०।५ । “एता विश्वा सवना तूतुमा कृषे” ऋ०१०।५०।६। “तूतुमा तूर्णानि” भा० ।

**तूद** पु० तुद–घञर्थे कर्म्मणि क पृषो०।१तूलवृक्षे राजनि०। अश्वत्थाकारे (पार्श्वपिप्पल) ख्याते वृक्षे भावप्र० “तूदं पक्वं गुरु स्वादु हिमं पित्तानिलापहम् । तदेवामं गुरु सरं संशोधि रक्तपित्तहृत्” ।

**तूदी** स्त्री देशभेदे । तूदी अभिजनोऽस्य ढक् । तौदेय पित्रादिक्रमेण तूदीदेशवासिनि त्रि० ।

**तूपर** पु० शृङ्गहीने १पशौ । स्त्रियां टाप् । तस्य शृङ्गहीनत्वकारणं यथा

“तासान्त्वेव वाऽनुपत्नासामहा एवेमौ द्वादशौ मासौ सं संवत्सरमापयामेति तासां द्वादशसु मासःसु शृङ्गाणि प्रावर्त्तन्त ताः सर्वमन्नाद्यमाप्नुवंस्ता एतस्तूपरास्तस्मात्ताः सर्वान् द्वादशमासः प्रेरते सर्वं हिता अन्नाद्यमाप्नुवन्” ताण्ड्य०ब्रा०४।१।२। “तुशब्दो वैलक्षण्यद्योतनार्थः,तासां गवां मध्ये काश्चिदब्रुवन् किमित्युच्यते, यौ द्वादशौ द्वादशसंख्यापूरकावेव शिष्टावेकादशद्वादशौ मासौ इमौ आसामहा एवं अनुष्ठायैवं अनुष्ठाय प्रारब्धं संवत्सरसाध्यं समापयामेति व्यवहितास्येति समित्यस्य व्यवहितेन सम्बन्धः, तासां गवां जातानि शृङ्गाणि द्वादशसु मासःसु मासेषु पूर्णेषु प्रावर्त्तन्त प्रापतन् दशभिर्मासैः शृङ्गप्राप्तिलक्षणफले सिद्धेऽपि पुनरश्रद्धया यतो मासद्वयमन्वतिष्ठन् अतो जातानामपि शृङ्गाणां पुनः पतनमित्यभिप्रायः, तथा चैतरेयकम् “अथ समापयिषयामः संवत्सरमित्यासत तासामश्रद्धया शृङ्गाणि प्रावर्त्तन्तेति” । एतास्तूपरा इति ताः पतितशृङ्गाः गावः सर्वत्तु भवमन्नाद्यमदनीयमन्नं प्राप्नुवन् ता गावस्तूपराः शृङ्गहीनाः दृश्यन्ते तस्मात्ताः सर्वान् द्वादश मासौ मासान् प्रेरते प्रगच्छन्ति ईर गतौ शीतवातातपेषु सर्वदा पुष्टाङ्गा एव यथायथं गच्छन्ति शृङ्गिणो महिषादयस्तु कृशा भवन्ति, तस्मादित्युक्तं कस्मादित्याह हि यस्मात्ता गावः सर्वमन्नाद्यमाप्नुवन् तस्मात् सर्वर्त्तुषु पुष्टाङ्गा भवन्ति तथा चैतरेयकम्“ऊर्ज्जत्वमसमन्वत तस्मादु ताः सर्वभूतान्तरमुत्तिष्ठन्तीति” भा० । “प्राजापत्यांश्च सप्तदश श्यामतूपरान् वस्तान्” कात्या० श्रौ० १४।२।१२ “अश्वस्तूपरो गोमृगस्ते प्राजापत्याः”यजु० ।२४।१ ।

**तूबर** पुंस्त्री० सौ० तु+क्विप् तूः वृ–वृत्यौ अच् कर्म्म० । तूपर+पृषो० पस्य बो वा ।१तूपरे कालेऽजातशृङ्गे पशौ २कालेऽजातश्मश्रुके पुरुषे ३अव्यक्तपुरुषलक्षणे च “जङ्घे तूवरकं क्षिप्रं कर्णस्य बलमादधत्” भा० द्रो० १२२अ० “तत्र तूवरकं बालं बह्वाशिनमविद्यकम्” भा० उ० १५८ अ० । २कषाये रसे पु० ३तद्वति त्रि० । ४आढक्यां ५सौराष्ट्रमृत्तिकायां स्त्री गौरा० ङीष् ।

**तूय** न० तोय+पृषो० । १जले निघण्टुः । तू–भावे सम्प० क्विप् तां याति या–क वा । २क्षिप्रे न० “देव हरिभिर्याहि तूयम्” ऋ० ३।४३।२ “तूयं क्षिप्रम्” भा० । ३क्षिप्रतायुक्ते त्रि०।“अद्रिणा ते मन्दिन इन्द्र ! तूयान्” ऋ० १०।२८।३ । “तूयानविलम्बितान्” भा० ।

**तूर** हिंसे, सक० वेगे अक० दिवा० आत्म० सेट् । तूर्य्यति अतूरिष्ट । तुतूरे ।

**तूर्** त्रि० तुर–कर्त्तरि क्विप् ।१वेगयुक्ते । भावे सम्प० क्विप् । २वेगे स्त्री “पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः” भा० २।७।२८। “अदृश्यतूर्भिः अलक्ष्यवेगाभिः” श्रीधरः ।

**तूर** न०तूर्य्यते ताड्यते मुखमारुतेन तूर–घञर्थे कर्मणि क । १वाद्यभेदे (सानाइ) हेमच० । २ताड्यमाने पटहादौ शब्दार्थचि० । [ धूस्तुरे भावप्र० ।

**तूरी** स्त्री तूरं तदाकारोऽस्त्यस्याः अच् गौरा० ङीष् ।